दिव्यतेजाः, [स्] स्त्री, (दिव्यं स्वर्गीयं देवतुल्यं तेजो यस्याः । अस्याः सेवनेन दिव्यतेजोवत्तेजआधायकत्वात् तथात्वम् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ (दिव्यं तेजो यस्य । अलौकिकतेजस्के, त्रि ॥)

दिव्यदोहदं, त्रि, (दिव्यं स्वर्गीयं दोहदम् अभिलाषो यत्र ।) उपयाचितम् । देवदेयवस्तु । इति त्रिकाण्डशेषः ॥ यथा, हारावली । २१ ॥
"यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये ।
उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः ॥

दिव्यपञ्चामृतं, क्ली, (पञ्चानां अमृतानां तत्तुल्यस्वादुगुणवद्द्रव्याणां समाहारः पञ्चामृतम् । दिव्यं पञ्चामृतमिति कर्म्मधारयः ।) मिलितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्कराख्यम्। इति राजनिर्घण्टः ॥

दिव्यपुष्पः, पुं, (दिव्यं मनोरमं पुष्पं यस्य ।) करवीरः । इति राजनिर्घण्टः ॥

दिव्यपुष्पा, स्त्री, (दिव्यानि मनोज्ञानि पुष्पाण्यस्याः ।) महाद्रोणा । इति राजनिर्घण्टः ॥

दिव्यपुष्पिका, स्त्री, (दिव्यपुष्प + संज्ञायां कन् टाप् अत इत्वञ्च ।) लोहितवर्णार्कवृक्षः । इति रत्नमाला ॥

दिव्ययमुना, स्त्री, (दिव्या यमुना तत्तुल्यफलप्रदत्वात् ।) कामरूपे दमनिकाया नद्याः पूर्व्वभागस्थसरिद्विशेषः । यथा,—
"तस्या नद्याः पूर्व्वभागे गङ्गेव फलदायिनी ।
माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः ॥
तथा दमनिकायाश्च परं निर्व्वाणमाप्नुयात् ।
ततः पूर्व्वे परा देवी नाम्ना सा सरिदुत्तमा ॥
महती दिव्ययमुना यमुनावत् फलप्रदा ।
दक्षिणाद्रिसमुद्भूता दक्षिणोदधिगामिनी ॥
तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नुयात् ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यरत्नं, क्ली, (दिव्यं चिन्तामात्रं तदर्थप्रदायकत्वादलौकिकं रत्नम् ।) चिन्तामणिः । इति शब्दार्थकल्पतरुः ॥

दिव्यरथः, पुं, (दिव्यः स्वर्गीयः अन्तरीक्षचरो वा रथः ।) व्योमयानम् । देवविमानः । इति शब्दरत्नावली ॥

दिव्यरसः, पुं, (दिव्यो रस इति नित्यकर्म्मधारयः ।) पारदः । इति राजनिर्घण्टः ॥

दिव्यलता, स्त्री, (दिव्या वनभवा लता ।) मूर्व्वालता । इति राजनिर्घण्टः ॥

दिव्यवस्त्रः, पुं, (दिव्यं वस्त्रमिव । अभिधानात् पुंस्त्वम् ।) सूर्य्यशोभा । इति शब्दरत्नावली ॥ (दिव्यं सुन्दरं वस्त्रमस्य ।) सुन्दरवस्त्रयुक्ते, त्रि । (दिव्यं सुन्दरं वस्त्रम् ।) क्ली, सुन्दरवस्त्रम् । (दिवि भवम् । यत् । दिव्यं वस्त्रमिति कर्म्मधारयः ।) दिविभववस्त्रम् ॥

दिव्यसारः, पुं, (दिव्यो मनोज्ञः सारो यस्य ।) शालवृक्षः । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । मनोज्ञत्वगुणवत्त्वात् दिव्येवेत्यर्थः ।) धात्री । इति मेदिनी । ये, ३१ ॥ वन्ध्या कर्कोटकी । शतावरी । महामेदा । ब्राह्मी । स्थूलजीरकः । श्वेतदूर्व्वा । हरीतकी । पुरा । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । यत् । ततष्टाप् ।) नायिकाभेदः ॥ (सा च इन्द्राण्यादिः ॥)

दिव्यादिव्यः, पुं, (दिव्यः स्वर्गीयः अदिव्यश्च ।) नायकभेदः ॥ (स च अर्ज्जुनादिः ॥)

दिव्यादिव्या, स्त्री, (दिव्या अदिव्या च ।) नायिकाभेदः । अस्याः प्रमाणं दिव्यशब्दे द्रष्टव्यम् ॥ उपदेवीविशेषः । इति शब्दार्थकल्पतरुः ॥

दिव्योदकं, क्ली, (दिव्यमान्तरीक्ष्यमुदकम् ।) आकाशजलम् । तत्पर्य्यायः । खवारि २ आकाशसलिलम् ३ व्योमोदकम् ४ अन्तरीक्षजलम् ५ । अस्य गुणाः । त्रिदोषनाशित्वम् । मधुरत्वम् । पथ्यत्वम् । परमरुच्यत्वम् । अग्निदत्वम् । तृष्णाश्रममेहापहारकत्वम् । पात्रापेक्षिगुणत्वञ्च ॥ अनार्त्तवस्य तस्य गुणः । सर्व्वेषां देहिनां त्रिदोषजनकत्वम् । सद्योभूमिस्थस्य तस्य गुणः । कलुषत्वम् । दोषदायकत्वञ्च । चिरस्थितस्य गुणाः । लघुत्वम् । स्वच्छत्वम् । पथ्यत्वम् । स्वादुत्वम् । सुखावहत्वञ्च । इति राजनिर्घण्टः ॥

दिव्योपपादुकः, त्रि, (दिवि भवः । दिव + "द्युप्रागपागुदक्प्रतीचो यत् ।" ४।२।१०१ । इति यत् । उपपद्यते इति । उप + पद + "लषपतपदस्थेति ।" ३।२।१५४ । इति उकञ् । ततो दिव्यश्चासौ उपपादुकश्चेति ।) देवता । इत्यमरः ।३।१।५० ॥ ("मातृपित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते ।" इति शब्दार्थचिन्तामणिः ॥)

दिव्यौघः, पुं, (दिव्यानां स्वर्गीयगुणानामोघः समूहो यत्र ।) गुरुविशेषः । यथा, शक्तिरत्नाकरतन्त्रे ।
"महादेवो महाकालस्त्रिपुरश्चैव भैरवः ।
दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते॥"
अपि च ।
"अथ तारागुरून् वक्ष्ये इष्टादृष्टफलप्रदान् ।
ऊर्द्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघान् सिद्धिदान् वत्स ! शृणुष्वावहितो मुदा ॥"
अपिच ।
"शृणु वत्स ! महादेव ! गुरून् दुर्गामनूद्भवान् ।
परमात्मा परानन्दः परमेष्ठी शुभोदयः ॥
क्षमाः कालः कलानाथो दिव्यौघा भैरवादिकाः ॥"
इति तन्त्रसारः ॥

दिश, औ ञ श ओचे । इति कविकल्पद्रुमः ॥ (तुदां-उभं-सकं-अनिट् ।) औ, अदिक्षत् । ञ श, दिशति दिशते । ओच इति उच्चैर्म्मसवायने इत्यस्य अति रूपम् । धातूनामनेकार्थत्वादोच इह दानमाज्ञापनं वा । दिदेश कौत्साय समस्तमेवेति रघुः । कथनेऽप्ययम् । धर्म्मं दिशति दैशिकः । इति दुर्गादासः ॥

दिशा, स्त्री, (दिश् + टाप् ।) दिक् । इति व्याकरणम् ॥ (यथा महाभारते । ४ । ५३ । १६ ।
"अत्र मध्ये यथार्कस्य रश्मयस्तिग्मतेजसः ।
दिशासु च तथा राजन् ! न संख्याताः शरास्तदा ॥")

दिशाः, [स्] स्त्री, (दिशतीति । दिश + बाहुलकात् कसुन् ।) दिक् । इत्यमरटीकायां मथुरानाथः ॥

दिश्यं, त्रि, (दिशि भवमिति । दिश् + "दिगादिभ्यो यत्" ।४।३।५४। इति यत् ।) दिग्भववस्तु । इत्यमरः । १ । ३ । २ ॥

दिष्टं, क्ली, (दिशति इष्टानिष्टफलं ददातीति । दिश् + "क्तिच्क्तौ च संज्ञायाम् ।" ३।३।१७४। इति क्तः ।) भाग्यम् । इत्यमरः । १ । ४ । २८ ॥ (यथा, महाभारते । १४ । ५३ । १६ ।
"ततस्ते निधनं प्राप्ताः सर्व्वे ससुतबान्धवाः ।
न दिष्टमत्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ॥"
दिश + कर्म्मणि क्तः ।) उपदिष्टे, त्रि । इति त्रिकाण्डशेषः ॥ (कथिते च । यथा, भट्टौ ।२।३२।
"गाधेयदिष्टं विरसं रसन्तं
रामोऽपि मायाचनमक्षचुक्षुः ॥")

दिष्टः, पुं, (दिशतीति । दिश + संज्ञायां क्तः ।) कालः । इत्यमरः । १ । ४ । १ ॥ (वैवस्वतमनोः पुत्त्रविशेषः । यथा, भागवते । ८ । १३ । २ ।
"नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥")
दारुहरिद्रा । इति शब्दमाला ॥

दिष्टान्तः, पुं, (दिष्टस्य भाग्यस्य अन्तो यत्र ।) मरणम् । इत्यमरः ।२।८।११६॥ (यथा, महाभारते ।१।५८।२७।
"मोचयित्वा तु भुजगान् सर्पसत्राद्द्विजोत्तमः ।
जगाम काले धर्म्मात्मा दिष्टान्तं पुत्त्रपौत्त्रवान् ॥")

दिष्टिः, स्त्री, (दिश + क्तिन् संज्ञायां क्तिच् वा ।) हर्षः । परिमाणम् । इति मेदिनी । टे, १८ ॥

दिष्ट्या, व, (दिशतीति सम्पदादित्वात् भावे क्विप् दिशम् । देशनं स्त्यायति । स्त्यै + क्विप् । ष्टुत्वम् । संज्ञापूर्व्वकत्वात् षत्वं न । यद्वा, दिशतीति । दिश + "अघ्न्यादिभ्यश्चेति ।" यक्प्रत्ययेन साधुः ।) आनन्दः । इत्यमरः ।३।४।१०॥ भाग्येन । यथा,—
"दिष्ट्याम्ब ! ते कुक्षिगतः परः पुमान् ॥"
इति श्रीभागवतम् ॥

दिष्णुः, त्रि, (ददातीति । दा + बाहुलकात् गिष्णु ।) दाता । इत्युणादिकोषः ॥

दिह, ल ञ औ लिपि । इति कविकल्पद्रुमः ॥ (अदां-उभं-अकं-सकं च-अनिट् ।) दिह उपचये इति प्राञ्चः । उपचयो वृद्धिस्तत्करणञ्च । ल ञ, देग्धि दिग्धे देहः प्रतिदिनमुपचितः स्यादित्यर्थः । देग्धि सौधं सुधया लेपकः । उपचितं करोतीत्यर्थः । औ, अधिक्षत् इति दुर्गादासः ॥